This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥हरिहिंॐ॥ईशाद्यास्यपाठ्यं॥यदज्ञानादि
दंविश्वंयज्ञानान्नेहकिंचन॥तज्ज्ञानंपरमानंदंवेदेशंकररूपिणं॥१॥
पूर्वकांडेउपात्तदुरितक्षयार्थंनित्यकर्मणिदर्शपौर्णमासादिन्यूक्ता
निकाम्यानिचफलार्थिनि॥इदानींकाम्यादिकारणाविद्यानिवृत्त्यर्थं
प्रस्तूयते॥तस्याःकर्मकांडेनसंबंधःउपादेयत्वेनोच्यते॥तत्तद्दर्श ॥१॥
पौर्णमासादिनित्यकर्मणिउच्चावचफलार्थंतयाविहितानिनपरमपूर
षार्थसाधकानि॥यतःसाध्यफलानितानि॥अनित्येचसाध्ये॥यस्मा
त्कंतदानित्यमिति॥नियमात्॥श्रुतेश्च॥तद्यथाकर्मजितोलोकः॥
क्षीयतएवमेवामुत्रपुण्यजितोलोकाः॥क्षीयतइति॥यद्दिहवाअप
नेकंमहत्पूण्यंकर्मकरोतितद्वास्यातताःक्षीयतवतिचयोवा॥एतद्द
क्षरमविदित्वास्मिन्लोकेजुहोतितपस्तप्यतेपिबहुनिवर्षसह

KKSU LIBRARY
RAMTEK
M-1155
Acc- No: M1155
Title :- ईशावास्यभाष्य
Author :- वेदांत
No :- 32
Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्राण्यंतवानेवास्यसलोकोभवतिति॥ननुहिनोदेष्टावेदोभवज्ञोला
कर्मकिमर्थंकथिवानित्याह॥पूंसामभिप्सितसाधनोपायप्रदर्शनायवर्त
मानोवेदोनादिभवपरंपरानूभूतानेकविषयवासनावासितांतःकरण
नविषयासक्तमानसेतिसहसाविषयपरांनिवर्तनेनपरमानंदावि
र्भावसाधनंप्रसंगात्तत्त्वंब्रह्मप्रवणतामापाद्यपरब्रह्मात्मतत्त्वबोधर
तुमशक्नुवन्नादौकर्मण्येवपूरुषार्थसाधनतयोपदिशतिं॥ततोनि
स्पृहैरित्यनेकमानुषनिष्ठुद्धांतःकरणस्यईश्वरार्पितैकर्मबुद्धिंसंपाद्य
ततोऽतिशुद्धांतःकरणस्यनित्यानित्यवस्तुविवेकद्वासुत्रार्थपोगरण
शून्यस्यलोकव्यवहारैरविक्षिप्यमाणस्यमाणेविश्रांतिकामयमाणस्यस
र्वोदिसाधनवनोऽधिकारसंपत्तिमालक्ष्यप्रसंगात्तत्त्वंब्रह्मणिविलि
प्यमानोब्रह्ममात्रमद्वयंसत्यज्ञानानंतानंदैकरसमवतिष्ठतइतिं॥
प्रयोजनंतत्त्वंब्रह्मअध्यारोपापवादाभ्यांअवगम्यस्वयंचते
म्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कस्यचिद्धनं॥स्विदितिनिपातोवितर्कवचनः॥कस्यापिधनं॥
मदांधस्यरूपणस्यधर्मोधर्मेविवेकशून्यस्यपतितस्यकुटिल
स्यधनंसूर्वणादियोगक्षेमार्थंद्रव्याकाक्षामाकर्षितित्यर्थः॥
आत्मानुचिंतनेनवपूर्णकामोपव॥अनन्याश्चिंतयंतोमांयेजनाः
पर्युपासते॥तेषांनित्याभियुक्तानांयोगक्षेमंवहाम्यहमिति॥
भगद्वाक्यविश्वासाच्च॥अथवाकस्यस्विद्धनंमीत्याभियुक्ता
नांयोगक्षेमप्रार्थः॥नकस्यस्विद्धनमस्ति॥यद्दृश्यतु॥आत्मव्यति
रिक्तंकिंचिदपिनास्तीत्यर्थः॥~~तथाचश्रुतिः~~॥तथाचश्रुतिः॥आ
त्मैवेदंसर्वं॥सर्वंखल्विदंब्रह्मविश्वमेवेदंपुरुषस्तद्विश्वमु

॥३॥ ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्धिवतीति।एवंस्तात्ब्रह्म।दक्षिणतोब्रह्म।पश्चाद्ब्रह्मोत्तर
तिर्य्यगूर्ध्वंचप्रसृतं।सब्रह्मससीवःसहरिःसेंद्रःसोक्षरः
परमस्वराट्।सएवविष्णुःसप्राणःसकालाग्निचंद्रमाःसएवसस
र्वयद्भूतंयच्चभव्यंसनातनं।यच्चामृतमस्यतिनाथःपंथाविमुक्तू
यथाऽस्याद्यनेकश्रुतिसमुच्चयात्।।भगवानपि।।समंपश्यन्।हि
सर्वत्रसमवस्थितमिश्वरं।।नहिनास्त्यात्मनात्मानंततोयातिपरमं
गतिमिति।।तथा।।सर्वभूतस्थितंयोमांभजत्येकत्वमास्थितः।।सर्वा
थावर्त्तमानोपिसयोगीमय्येवर्त्ततइति।।कर्मसंन्यासेनापिवर्तमानोपि
योज्ञानीप्रपद्यवर्त्ततेमुच्यतेनतुभ्रश्यतियैःसेव्यायस्त्वविद्यानिमी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोत्तरपुर्वाघयोरेवेदेविनाशात्मावाद्विषयत्यागेऽसमर्थस्तंप्र
प्रतिसकरलाम्नूतिःसाधनमाह।।कुर्वन्नेवेहकर्म्माणिजिजी
विषेच्छतंसमाः।।इहकर्मसुमोक्कर्म्माण्यग्निहोत्रादीनिईश्वर
प्रितये।।कुर्वन्नेवत्मवान्नजिजीविषेत्तजिवतुमिच्छेत्।।शतंः
समाः।।शतवर्षाणि।।धनवैराग्यभावोयोदि[illegible]दृश्यर्थः।।ई व
श्वरार्पणंकर्मकुर्वतः।।कर्मलोपोनभवतिस्याह।।एवंत्वयिनान्य
थेतोस्तिनकर्मलिप्यतेनरे।।यवमुक्तप्रकारेणईश्वरप्रितये
कर्माणिकुर्वतिनरेनरभिमानित्वइत्वंनकर्मलिप्यतेभगवा
न्कर्मणानलिप्यतेयर्थः।।नान्यथेतोस्तितिः।।इतःएतस्मादी
श्वरार्पणबुद्धेःकर्मानुष्ठानलक्षणात्मार्गात्तूअन्यथामार्गो

तरं नास्तियेन मार्गेणअशुभंकर्म नलिप्यते॥अतःशास्त्रविहि
तांन्यग्निहोत्रादिनिकर्माणिकुर्वन्नेवजिजीविषेदित्यर्थः॥कुर्व
वानपि॥ब्रह्मण्याधायकर्मातिसंगंत्यक्त्वाकरोतियः॥लिप्यते
नसपापेनपद्मपत्रमिवांभसेति॥तथाअनाश्रितःकर्मफलंका
र्यंकर्मकरोतियः॥ससन्न्यासिचयोगिचनिरग्निर्नचाक्रियइति॥
फलत्यागेनविधुन्तकर्मकुर्वतस्तवधनविषयेपिवैराग्यंपवि
ष्यतीतात्पर्यं॥एतदुक्तंभवति॥साक्षादनुभवपर्यंतमेकाज्ञा नंदा४
नमार्गः॥ईश्वरप्रीत्यैकर्मकरणंद्वितीयोमार्गः॥देवतोपासेपा न
रूपयात्मकमेव॥अस्माद्द्वोक्तमार्गद्वयासुरुषार्थसाधनंमा
र्गोत्तरंनास्तीत्यर्थः॥वसिष्ठश्च॥अंतस्तिमिरनाशायशास्त्रबोधो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निरर्थकः॥ तमो ननस्य तेरामरुतया दीपवार्त्तया॥ ग्रंथांतरेपि॥
संसारिक क्रियामुक्तब्रह्मज्ञोस्मिति वादीनं कर्मब्रह्मोपयत्रसो
तंत्यजेदं [illegible]त्यजंयथा॥ वृथादेवं परित्यक्ता कर्म कांडवितंडितः
पाखंडाः पंडितंमन्यानतेकिमपिजानतइति॥ भगवानपि॥ नक
र्मणामनारंभान्नैष्कर्म्यपुरुषोश्नुते॥ नचसन्यसनादेवसिद्धिं
समधिगच्छतिति॥ अन्नेतच्चिंत्यते विद्योत्पत्तौ कर्मनिमित्तंचेदु
च्यतेतर्हि आश्रमांतरानुपपत्तिःस्यात्गच्छचविहितानि कर्माणि
अतएकाश्रममेवार्थाश्रास्यं॥ एवंचसतियावज्जीवमग्निहोत्रं
जुहुयादित्यादिश्रूतयोप्यनुकूलतरास्युः॥ तन्नः॥ कर्मभूयस्त्वा

॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म-
तू॥नत्येवंनी होत्रादिवकर्माणि॥किंतु॥ब्रह्मचर्यतपःसत्य
वचनशमदमाहिंसेसवमादीनिकर्माणिइतराश्रमेपिविद्यास्
तौसाधकतमानिसंति॥ध्यानधर्षणादिन्यपिकर्माणिअसं
२ किर्णत्वोविद्यंते॥किंच॥जन्मांतरकृतकर्मभिःशुद्धांतःकरण
स्यगार्हस्थ्यात्प्रागपिविद्योत्पतिंदर्शयते॥कर्मार्थेचोद्यार्हस्था
प्रतिपद्यते॥कर्मसाध्यायांचविद्यायांसत्सांगार्हस्थ्यात्प्रतिप्र
त्तिर्व्यर्थैव॥नलोकार्थत्वात्॥पुत्रादिसाध्यलोकस्यानित्का
मस्यनित्यलोकदर्शिनःकर्मणिप्रयोजनमपश्यतःकथंतत्र
प्रवृत्तिस्यात्॥प्रतिपन्नगार्हस्थ्यास्यपिविद्योत्पत्तौविद्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परिपाकात्विरक्तस्यकर्मभ्योनिवृत्तिरेवस्यात्।।प्रव्रजिष्यन्वा
अरोमंस्यात्।।स्थानादस्मिन्यवमादिश्रुतिलिंगदर्शनात्।।कर्मसुश्रु
तेयत्नाधिक्यदर्शनादयुक्तमितिचेत्।।अग्निहोत्रादिकर्मसुश्रूयतेर
धिकोयत्नोमहांश्चायासः।।अनेकसाधनसाध्यत्वात्तेषांतपोब्रह्म
चर्यादिनाचेतरांश्रमैर्कणांगाछस्थेपितुल्यत्वात्।।अल्पसाधना
पेक्षत्वाच्चेतरेषांनयुक्तस्तूल्यवदिकल्पआश्रमकिंस्तस्यचेत्त
नैजन्मांतरीयमपिकर्मशुक्लंविद्योत्पत्तिंप्रत्यनुग्रहकंभवति।।यतः
केचिज्जन्मांतरएवविरक्तादृश्यंते।।केचित्कर्मसुप्रवृत्ताअविरक्ताविं
द्याद्वेषिणश्चदृश्यंते।।तस्माज्जन्मांतरेकृतसंस्कारैंविरक्तानामा
जन्मांतरलब्धानुग्रहात्।दृष्टैकजन्मकर्मणिश्रुतेरधिकोयत्नइष्यतेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रमांतरप्रतिपत्तिरेवेष्यते॥पुत्रस्वर्गब्रह्मवर्चसादिलक्षणस्यकर्म
फलस्यबाहुल्यत्वात्प्रतिपुरुषाणांकामभूयस्त्वाच्चतदर्थंश्रुतरधिको
यत्न॰कर्मसुप्रपद्यते॥आसिषांबाहुल्यदर्शनादिदंमेस्यादितिउपाय
त्वाच्चउपायभूतानीहकर्माणिसवचाम॥उपायेचाधिकोयत्नःकर्त्तव्यो
ना नापाये॥कर्मार्पितत्वाद्विद्यायायघनातरानर्थक्यमितिचेत्॥क
र्मोच्यएवप्रतिबंधंतरिक्षयाद्विद्योत्पत्तेश्चत्कर्मभ्यःपृथगुपनीय
श्रवणादियत्नोव्यर्थएवस्यात्॥॰ननियमाभावात्॥नहिप्रबंधक्षया
देवविद्योत्पते॥नचिश्वरप्रसादात्तपोध्यायानुष्ठानादितिनियमोस्तिः॥
अहिंसाब्रह्मचर्यादिनांविद्याप्रत्यूपकारकत्वात्साक्षात्कारणत्वंचित्र
वणमननिदिध्यासनानां॰अतःसिद्धंन्योश्रमातरेणाविद्या

ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याचसर्वेषांमधिकारश्रियश्चापितयेवेतिसिद्धः॥अथकविद्याप्र
शंसार्थमविद्यानिन्दामाह॥असुर्याणामतेलोकाअंधेनतमसावृताः॥
तांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोजनाः॥परमात्मभावमुपे
क्ष्यदेवादयोऽसुराः॥तेषांस्वभूतालोकोऽसुर्यः॥नामतोद्वेषप्रसि
द्धवाचिः॥तेलोकाः॥कर्मफलरूपादेहविशेषाः॥अंधेनअहंममता
भिनिवेशरूपेणांधतमिस्रेणतमसाअज्ञानलक्षणेनांधकारेण
आवृताःआच्छादितास्तांस्देहविशेषान्तेप्रवृत्तिंचनिवृत्तिंचज
नाविदुरसुराइत्याशुक्लक्षणाः॥ज्ञानश्रुत्याप्रेरितोज्ञान
साधनोपकरणंमनुष्यशरीरंदेवपरिग्रह्यंअभिगच्छंतिसमंतात्
प्राप्नुवंति॥तेकेइत्याहयेकेचात्महनोआत्महनोविज्ञानमो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नंदब्रह्मेतिस्वस्वरूपाविदोजंनाःसंसारसमुद्रेपुनःपुनर्ज
ननमरणैर्भिद्यंते॥तथाचोक्तं॥अन्यथासंतमात्मानमन्यथा
प्रतिपद्यते॥किंतेनेहकृतंपापंचोरोणात्मापहरिष्यति॥पाप
कारिपापोपलब्धिश्रुतेश्च॥तस्मिन्दृश्यमात्मतत्वंनसाहे॥
अनेजदेकंमनसोजवियोनैनद्देवाआप्नुवन्पूर्वमर्षत॥तद्धा
वतोन्यान्नेतिष्ठत्तस्मिन्नपोमातरिश्वदधाति॥एजत्कंपने
कंपनमकुर्वत्॥अनेनसमष्टिप्राणयोर्निरासाः॥एकंस्वजातियवि
जातियस्वगतभेदशून्यं॥इतिनिरुपाधिस्वरूपमुक्तं॥अथसोपा
धिस्वरूपमुच्यते॥मनःसंकल्पादिलक्षणंतःकरणं॥जवी

यः वेगत्तरं यत्र मनो न याति तत्र पुरतः आत्मतत्त्वमेव प्रकाशते इत्य
र्थः नेतत्र सूर्यो भाति । न चंद्रतारकं । नेमा विद्युतो भांति । कुतो
यमग्निः । तमेव भांतमनुभाति सर्वं । तस्य भासा सर्वमिदं वि
भाति इति श्रूयंतरां च । किंच । नेत्तदेवा आप्नुवन् । घोत्तना
देवाश्चक्षुरादयः । एतदात्मतत्त्वं न आप्नुवन् न प्राप्नुवन् । नाधि
गतवंतः कुतः पुर्वप्रथमतः अर्षत् गतवत् । आकारावश्रापित्वा
सर्वतो वा तमित्यर्थः । तस्मात्तत्त्वं धावतः शिघ्रं गच्छतः । अन्यान्
काल्वादिन् आत्मविलक्षणान् त्यजति । अतीत्य गच्छति इवेवो
र्थे स्वयंप्रवाहः तिष्ठत् गमनक्रियां ~~गमनाद्य~~ गच्छत्तत्तस्मिं
न्नात्मतत्त्वे गच्छंति शून्ये निश्चेतन्यस्वभावा अपः प्राणिनां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मणियज्ञदानहोमादीनिअग्न्यादीनांचज्वलनदहनादिनि
मातरिश्वमातरिआकाशेप्यसतिसमष्टिव्यष्टिरूपोवायुः
क्रियाशक्तिःसूत्रात्मेतियावत्।दधातिधारयतिछापयती
तिवा।भीषास्माद्वातःपवतेभीषोदेतिसूर्यःइत्यादिश्रुतिभि
र्नियचैतन्यात्मस्वरूपेसर्वाश्रयस्वरूपेआत्मतत्त्वेसंघातस्यव
वोहिकार्यकारणादिविक्रियाभवंतीत्यर्थः।नमंत्रोणानिया
मितास्तीतिपूर्वमंत्रोक्तप्रत्यर्थंकिंचिद्दोषंदर्शयन्नाह।
तदेजतितन्नैजतितद्दूरेतद्वंतिके॥तदंतरस्यसर्वस्यतदु
सर्वस्यास्यबाह्यतः॥यइहैतन्मनसचेतदेजति॥उपधांव
र्त्तेचलतितद्वनएजतिस्वस्वरूपतोनचलतिनिश्चलमेवसत्॥
चे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चलतीवेत्यर्थः। तद्दूरे॥अविदूरमप्राप्य दूरश्चलश्च योजनान्त
रितमिवतत्तेनुएवअंतिकेअतिसमीपेसर्वस्यकृत्स्नात्। एषतद्
आत्मासर्वांतरतइतिश्रुतेरन्तराच्च। नकेवलंदूरेअंतिकेचतद्
वेत्यर्थः। तदात्मतत्त्वंअस्यनामरूपक्रियोपेतस्यजगतः॥
सर्वस्यसमग्रस्यअंतर्मध्येतदुतदेवसर्वस्यास्यबाह्यतः ॥१॥
बहिरपि॥व्योमवद्व्यापकत्वात्। बहिरंतश्चभूतानांस्थ
चरंचैवचसूक्ष्मत्वादविज्ञेयंदूरस्थंचांतिकंचतदिति
स्मृतेश्च॥तल्लक्षणमाह। यस्तुसर्वाणिभूतान्यात्मन्येवानुपश्य
पश्यति। सर्वभूतेषुचात्मानंततोनविजुगुप्सते॥यस्तुवि चि
द्वान्सर्वाणिभूतान्यव्यक्तादिस्थावरांतानिआत्मन्येवनित्या
नेश्वरप्रकाशरूपेणानुपश्यति। अन्वनुसदापश्यति॥आत्मचेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसादेसर्वदुःखानांहानिरस्योपजायते।। ५

~~येमंत्रंप्रपठन्ति~~ इतिनप्रणस्यामिअहंस्योपवामिसत्यमाहशो
नमवैतिगुरुरूपेणप्रत्यक्षोभूत्वातंकृपादृष्ट्यावलोक्यअनुग
ण्हामिप्रसादंकरोमीत्यर्थःतथाचप्रसादेसर्वदुःखानांहानिःत
थाचस्कंदेबहुनोक्तेनकिंसाक्षादैत्रिकस्यनिरीक्षणात्प्रसा
दादेवरुद्रस्यपरज्ञातेथैवचाश्रुतिपरिफलापुण्यपरिपाक
बलादपिशिवरूपतयासर्वस्यशोदेवपश्यतितत्रैवप्रसादे
नविनादेवंनजानंतिसुरर्षभाः।।नजानंतिविनाघ्राणंगंध ६
हस्तेनकेवलंपतितोपतितोवापिपंडितोमूढएववा।।प्रसा
दतक्षणादेवमुच्यतेनात्रसंशयः।प्रसादेसतिदेवेशदुर्विज्ञे
यःसुरर्षभैः।।शक्यतेमनुजैर्द्रष्टुंप्रसन्नामृत्यासदा।।भवतोपि
महादेवप्रसादायमुनीश्वरैःगुरुपादांबुजंनियंजयध्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साक्षात्कारवान्भवतीत्यर्थः॥तथासर्वभूतेषुचात्मनंआनंदा
त्मानमपितेषुचाचकारोनुपश्यतितिक्रियासमुच्चयार्थः॥एवं
सर्वत्रानंदात्मानुदर्शनेफलमाह॥ततोनविचिकित्सतिविचिकि
त्सानप्राप्नोति॥ततःआनंदात्माचिदेकरसोहमेवसर्वमितिविद्वा
न्नजुगुप्सते॥गुपरक्षणे॥आनंदात्मेतिरिक्तेणकिमपिनरक्ष ८८
ति॥तच्चशोधनेआत्मानमेवजयंतशुद्धंपरिपूर्णचिदानंदैक
रसंनिरंतरंपश्यतीत्यर्थः॥असंतरन्चासमंपश्यन्नत्रब्रह्म
परमंयातिनान्येहेतुतेति॥भगवानपिसर्वभूतस्थमात्मानं
सर्वभूतानिचात्मनिईक्षतेयोगयुक्तात्मासर्वत्रसमदर्शनः॥यो
मांपश्यतिसर्वत्रसर्वंचमयिपश्यति॥तस्याहंनप्रणश्यामिसचमेनप्र-
श्यति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मेदकेवलंशुद्धं विद्यतेतच्चदर्शने॥ नचविद्यानचैविद्यानचत
च्चनचापरे॥ तौरूपोमहादेवस्खलुसाक्षात्सनातनः॥ इदृशी
परमोनिष्ठागुरोःसाक्षान्निरिक्षणात्॥ कर्मसाम्येचेनायासा
सिध्यत्येवनसंशयइति॥छंदोगे॥ यएषोक्षिणिपुरुषोदृश्यतेस
एषआत्मेतिहोवाचैतदमृतंमभयमेतब्रह्मेतिइतिसर्वशास्त्र
हृस्यमुक्त्वाअथपूर्वमंत्रैरुक्तंआनंदात्मातस्यस्वरूलक्षणमाह॥
सपर्य्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धं॥कवि
र्मनिषीपरिभूस्वयंभूर्याथातथ्यतोर्थान्व्यदधाच्छाश्वतीभ्यःसमा
भ्यः॥सपूर्नोरुआनंदात्मापर्यगात्॥परितःसमंतात्॥अधिग
तवान्व्योमवत्सर्वव्यापीत्यर्थः॥ॐकंशुचिदीप्तोशुचिमादिप्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानूइत्यर्थः॥आकायंआदेहं॥सूक्ष्मशरिरवर्जितः॥अव्रणंअ
छिद्रंअहतइत्यर्थः॥अस्नाविरं॥स्नावानिस्त्रिरिरः॥नविद्यतेयस्य
तदस्नाविरं॥स्थूलशरिररहितइत्यर्थः॥तत्रहेतुः॥शुद्धंनिर्मलं॥
यतअपापविद्धं॥दुःखहेतुरविद्यातद्रहितइत्यर्थः॥शुक्रमित्या
दिवचनानिपुल्लिंगत्वेनपरिणयानि॥यतःसपर्यगादिस्यूपक्रम्य ॥१२॥
॥१२॥ कविर्मणि॥विंसादिनापुल्लींगत्वेनोपसंहारात्॥कविःक्रांतदर्शी
सर्वदृष्टेत्यर्थः॥नान्यतोस्तिदृष्टेत्यादिश्रुतेः॥मनीषिमनसोनी
यंतासर्वेश्वरइत्यर्थः॥तत्रहेतुः॥परिभुःसर्वोपरिभवतिद्युतिप
रिभुः॥सर्वोपरिस्थितः॥स्वयंभूः॥कारणाद्यनिरपेक्षःस्वयंभ
वभवतीतिस्वयंभुः॥सर्वरूपीत्यर्थः॥यथातथातः यथातथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानतः ॥ ततः बृहदारण्यके ॥ आत्मनेचेद्विजानीयादयमस्मीति
पूरुषः ॥ किमिच्छन्कस्यकामायशरीरमनुसंज्वरेदिति ॥ अन्यत्र ॥
यथापूर्वद्रुमाद्विपूनाश्रयंतिमगाद्विजः ॥ तथाब्रह्मविदोंघानाश्रयंति दे
कदाचनेति ॥ यैकचंप्राणमनसोरिंद्रियाणांतथैवच ॥ सर्वभाव
परित्यागोयोगइत्यभिधीयते ॥ तस्मान्निर्विद्य सोयोनिः विद्या
संकल्पानिरवशिष्यन्तेस्तिष्ठदंतत ॥ मोक्षलक्षमितिश्रुतेः ॥
आत्मज्ञःशोकसंतीर्णोनबिभेतिकुतश्चनेति ॥ भगवानपि ॥ विहा
यकामान्यःसर्वान्पुमांश्चरतिनिस्पृहः ॥ निर्ममोनिरहंकारः ॥ स शां
तिमध्येधिगच्छति ॥ एषांब्राह्मीस्थितिंपार्थनैनांप्राप्यविमुह्यति ॥ नैनं
तिं ॥ स्थित्वास्यामंतकालेपिब्रह्मनिर्वाणमृच्छतिइतिच ॥ स्कंदेच ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथाबलमिति॥आचार्योब्रह्मपुरुषावहदेतिश्रुतेश्च॥सर्वसं
श्रुतिनामंत्रेतात्पर्यमिति॥प्रदर्शनार्थंपूर्वोक्तमंत्रोक्तमेवार्थंपुनराह॥
यस्मिन्सर्वाणिभूतान्यात्मैवाभूद्विजानतः॥तत्रकोमोहःकःशो
ककएकत्वमनुपश्यतः॥यस्मिन्काले सर्वाणिभूतानिपरमात्मा
नुभावज्ञानेनैवात्मैवाभूत्॥प्रतिलोमासमानंस्वरूपंपरित्यज्यैक्यंआ
दास्मरूपेवाभूत्॥कस्यज्ञानतःपरमार्थवस्तूविज्ञानतः॥तत्रतस्मि
न्काले॥कइत्याक्षेपेमोहादेतभावकः नकोपीत्यर्थः॥ब्रह्मवेदब्रह्मैव
तीतिश्रुतेः॥शोकोविक्षेपासकः॥शोपिकः तरतिशोकमात्मविदिति
श्रुतेः॥यतःएकमपश्यतः॥आनंदस्वरूपमिदंसर्वमहमस्मीतिवि

को

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पावोयथातथ्यं तस्मात्प्रयथाश्रुतकर्मफलसंधनतः॥अर्थान्
विविधपदार्थान्व्यदधात्॥कल्पितवान्यथारूपंव्यस्याज्ञाति
स्यर्थः॥शाश्वतीर्योनिर्भ्यः॥समाभ्यःसंवत्सरेभ्यःप्रजा
इत्यर्थः॥एवमात्मनःस्वरूपमुक्त्वेदानीयेकेवलकर्मपराःकामिनस्तान् इ
त्याह॥अंधतमंप्रविशंतियेविद्यामुपासते॥अंधतमःअहंममा
भिमानात्मकंतमःप्रविशंतिप्रकर्षेणप्राप्नुवंतितेके॥येअविद्यांअ
ग्निहोत्रादिलक्षणमेवकेवलांकामाद्यर्थेउपासते॥तदेकनिर्ज्ञः
संतःअनुतिष्ठंति॥ननुतर्हिकर्मसमुच्चादेवताज्ञानमेकनिष्ठेनैवं ५ ६
अहंब्रह्मास्मीतिवक्तव्यमित्यतआह॥ततोभूयइवतेतमोयउ
विद्यायाइरताः॥ततस्तस्मादंधतमसात्भूयइवअधिकमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वते तमः प्रविशंति सूत्रानुषंगः ॥ ते के ॥ ये कर्म हित्वा विद्यायामेव रताः केवलदेताज्ञानपरः मुखतएव ते तमः प्रविशंति सूत्रानुसंगः ब्रह्मवादिनो वा ब्रह्मसाक्षात्कारं विनैव कर्मस्वामिनईश्वरेः ॥ ननु तर्हि कर्म विद्ययोर्निष्ठयासमुच्चयमपि किंनि फलमेवनेत्याह ॥ अन्यदेवाहुर्विद्ययान्यदाहुरविद्यया ॥ इतिशुश्रुमधीराणांयेनस्तद्विचचक्षिरे ॥ अन्यदेवपथोगवआहुर्वदंति ॥ विद्यायादेवताज्ञानेन ब्रह्मवादेनवादेवयानलक्षणोवाआत्मप्राप्तिलक्षणोवाफलंक्रियतइति ॥ अन्यदेवाहुर्विद्यायाकर्मणापितृलोकप्राप्तिलक्षणंक्रियतइति ॥ तथाचश्रुतिः ॥ कर्मणापितृलोकोविद्ययादेवलोकइति ॥ इतिहेशुश्रुमश्रुतवंतोवयं ॥ धीराणांपूर्वेषांतत्रन्यायकुशलानां धीमतांवचःयेनैतिर्कैः नाअस्माभ्यंतत्तज्ज्ञानकर्मचविचचक्षिरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्याख्यातवंत॰तेषांपरपर्यायतोयमागमइत्यर्थः॥एवंविद्याविद्यो
याःपृथक्फलमुक्तेदानींसमुच्चयमाह॥विद्यांचाविद्यांचयस्तद्वेदो
भयंसह॥अविद्ययामृत्यूंतित्वाविद्ययामृतमश्नुते॥विद्यांचदेव
ताज्ञानंअविद्यांचकर्मतदुभयंयोविद्यानसहैकेनपुरुषेण॥
नुष्ठेयंवेदेजानाति॥एतत्तृज्ञानवतस्तस्यफलमाह॥अविद्यया
कर्मज्ञानेनमृत्यूंस्वाभाविकंकर्मज्ञानंचदुःखबिजंतित्वोअति
तिक्रम्यविद्ययादेवताज्ञानेनअमृतंदेवेश्वरात्मभावमश्नुते
प्राप्नोति॥देवोभूत्वादेवान्यतीतिश्रुतेः॥अथवाविद्याईश्वररूप
एकर्मनिष्ठयामृत्यूंविद्योत्पत्तिप्रबंधकर्मेनस्तीर्त्वाविद्ययावेद्यं
तज्ज्ञानेनअमृतंमोक्षंअश्नुतेप्राप्नोति॥कषयःपक्तिःमीलणिं
ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानंपरमिकागतिरितिश्रूतेः॥अथवाअविद्ययागुरुपासनया
मृत्युंकामबिंअज्ञानंतीर्त्वाअतिक्रम्यविनाशंक्रियथेः॥विद्यया
चिंतैप्रसादेनामृतमव्ययंसुखंप्राप्नोति॥मृत्युंवैतमोज्योतिर
तममृतमव्ययंश्रूतेः॥चित्तस्यहिप्रसादेनहंतिकर्मशुक्लाशुक्लं॥
प्रसन्नमात्मनिस्थित्वासुखमव्ययमश्नुतइति॥तथाचराम
प्रतिवसिष्ठः॥विचारोपशमोपैचित्तमार्धंयात्मनः॥तस्मिंते
सिद्धेसवान्सिद्धोनाचेत्वंनगर्धकइति॥इदानींव्याकृताव्याकृ
तयोरुपासनस्यप्रयोजकंनिर्दिशति॥~~अव्यक्तमप्रविशन्ति~~
यःप्रकृतिःकारणमव्यक्तंप्रधानंबह्मक्षरक्षेत्रं॥तमःप्रसूत
मव्याकृताख्यंताअप्येसंतिंउपासते॥इतरेत्वष्टं॥येचसप्तसूत्याका
अधंतमःप्रविशंतियेसंभूतिमुपासते॥ततोभूयइवतेतमो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यंब्रह्मणिसंमिष्टप्राणेहिरण्यगर्भोरय्यरताःतेततःभूयइवतमः
प्रविशंति॥अन्यदेवाहुःसंभवादन्यदाहुरसंभवात्॥इतिशुश्रु
माधिराणांयेनस्तद्विचचक्षिरे॥संभवात्हिरण्यगर्भोपासना
त्अणिमाद्यैश्वर्यलक्षणमाहुःतथाअसंभवात्कारणोपासनात्
प्रकृत्तोलयइति॥यस्तंस्यद्वं॥संभूतिंचविनाशंचयस्तद्वेदो
भयंसह॥विनाशेनमृत्यूंतीर्त्वासंभूत्यामृतमश्नुते॥यःका
र्यकारणात्मकमेतदुभयंसहवेदजानातिसविनाशेनहिरण्यगर्भो
पासनेनअणिमाद्यैश्वर्यादिकंमृत्यूमतिक्रम्यकारणोपासनेन
अमृतंमोक्षलक्षणंफलंमश्नुतेतस्मिन्लयंप्राप्नोति॥अंधतमः
प्रविशंतीत्यादिशिरेतदुत्कंपवति॥समस्तकेवलंमश्नुतेतस्मिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मधुमादिमार्गेणचंद्रलोकप्राप्तिकारणंप्राणादिदेवताविज्ञान
सहितंचअर्चनादिमार्गेणब्रह्मप्राप्तिकारणं।।एवंमानुषदेवविस्ता
ध्यंशास्त्रोक्तफलप्रकृतिलयांतमेव।।एतावतिसंसारगतिविषय
षः।।अतःसर्वेषांत्यागेनआनंदात्मकैकरसब्रह्मैवनमेवपरमपुरुषा
र्थेनान्यत्इतिभावः।।एवंप्रवृत्तिनिवृत्तिलक्षणोवेदार्थोत्रप्रकाशि
तः।।इदानिकार्येकारणात्माआदित्यमंडलस्थःपुरुषस्तत्साक्ष्ये ।।१५।।
आदित्यप्रार्थनामंत्रानाह।।हिरण्मयेनपात्रेणसत्यस्यापिहितं
मुखं।।तत्त्वंपूषन्नपावृणुसत्यधर्मायदृष्टये।।हिरण्यप्रचुरैर्यैव हि
हिरण्मयप्रकाशबहुलंव्रतनपिधानमूतेनआदित्यमंडलेनसत्यस्या
दित्यमंडलस्थस्यब्रह्मणःबोधरहितस्यपुरुषस्यमुखंद्वारंअप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि तं आच्छादितं। तद्धिरण्मयं पात्रं हे पुषन् पुष्टिकारिन्। सत्यधर्म
अपसोर्य। किमर्थं तदाह। सत्यस्य तवोपासनाद्वयमपि सत्यधर्म
स्तस्मै मह्यं दृष्टये उपलब्धये तव सत्यात्मनोदरं नार्थमित्यर्थः।
पुषन्नेकर्षे यम सूर्यप्राजापत्य व्यूह रश्मीन् समूह तेजो यत्ते रूपं
कल्याणतमं तत्ते पश्यामि। योसावसौ पुरुषः सोहमस्मि। ऋषः
पुषन् जगतः पोषणात्पुषा तत्संबोधने हे पुषन्। एकर्षे। एक एवं
ऋषति गच्छति इत्येकर्षिः तत्संबुद्धिः एकर्षे एकचारिन्। यमः। यम
र्यतियमः हे यम सर्वनियंतः सूर्य हे सुष्ठु गमन प्राजापत्य प्राजा
पतेरयं प्राजापत्यः। तत्संबोधने हे प्राजापत्य। एवं चरस्मीनूत्वानु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रपान् किरणान् व्यूहसंहरणतः समुहयेकीकुरु। सम्यक् स्वास
मात्रंकुर्विग्रर्थः। किमर्थं। तेजस्तोपनं स्वयंज्योतिः स्वभावं कल्याण
तमंशोभनतमं अत्यंतानंदात्मस्वरूपं परं तद्यथापश्यामि ते
तवप्रसादात्साक्षात्करोमितथाकुर्वित्यर्थः दृष्टदृश्यप्रभेदवा
रयन्नाह। योसावादित्यमंडलस्थः पुरुषः अयंचोसोहं
स्मदृष्ट्याप्रत्यक्षः पुरुषः पुरुषाद्वैरचात्र प्राणरूपस्सर्वैरपाद्य
पुरिशयनाद्वा। एवमुक्तलक्षणः पुरुषः सोहं अस्मत्सत्तयावलंबे
नोभवामि। ततश्च तत्राः समुच्चयानुष्ठात्रा निसंसहस्रपठ
नीयाः। अंतकालेप्यात्मरूपेआत्मानंध्यात्वापठनीयाः एवं
पास्यकृत्स्नशरीरपातानंतरंयेध्यवतिष्ठंतदाह। वायुरनिलममृतम
थेदंभस्मांतं शरीरं ॐक्रतोस्मरक्रतं स्मरवायुः ॥१६
प्राणोऽनिलंसमष्टिप्राणंअमृतहिरण्यगर्भरूपं प्रतिपद्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नइतिवाक्यशेषः।अथानंतरंइंद्रस्थूलशरीरंअग्नोहंतंमस्मांत
रप्रवीयातीयर्थः॥अथोपास्यदेवताप्रार्थनमाह।ॐमितिमिस
त्सात्मब्रह्मेवोच्यते॥क्रतोयत्पुरुषःइहोवैविद्धुरितिश्रुतेःहे
विद्धाव्योपक्रमरचदुपासकूंमांस्मर।तथाहतंस्मरैलक्ष्यते क्रतुः स
र।भोभगवन्त्वयाकृतंमयाचबाल्यात्प्रमादितंतमनुक्षितव्यं
मंतच्चस्मर।हतंस्मरतिपुनर्वचनंआदरार्थं।शोभनमार्ग
याचनमंत्रमाह।अग्नेनयसुपथारायेअस्मान्विश्वानिदेवव
युनानिविद्वान्।युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमउक्तिंवि
धेम॥भोअग्नेआस्मान्समुच्चयानुष्ठातॄन्सुपथाशोभन
मार्गान्नरमार्गंराये धनयकर्मज्ञानफलभोगार्थंनय।नीचैप्रा
पयेत्यर्थः।तथाहेदेवद्योतनस्वरूपविश्वानिसर्वाणिव
युनानियूर्माणिज्ञानानिचविद्वान्ज्ञानरूपेअतःअस्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपासकानांडहुरणाद्वच्छाकौटिल्यंइति धातुः।कुटिलंअन्निलषि
तंप्रतिबंधकमनःयुयोधियुएधवृकरेएधगविनाशनेइत्यर्थः।
ततोवयंविशुद्धाःतंतोन्निलषितंप्राप्स्यामीतिभावः।अस्मिन्नर्थे
तुप्रयुक्तोनिरायनमयस्मिन्मुक्तिप्रसंकारवचनंवि
धेमकरवाम॥अस्मिन्कूलेअन्यापरिचर्यांकृत्वाप्रसादयं
वूवलंनमस्कारवचनेनपरिचर्यैतितात्पर्यार्थः।अथवप्रे
वाइसनेयशाखाओंखंब्रह्मेतिमंत्रोस्तितथेयंव्याख्याविद्याना
नंदात्मब्रह्मणःओंकारालंबनाचेनध्यानमुच्यते॥ओंखंब्रह्मेति॥
ओंकारःखंब्रह्मेतिध्येयःअत्रब्रह्मविशेष्यंखंविशेषणंनिलो
पलक्षणत्वात्ओंखंब्रह्मेतिविशेष्यंविशेषणंयोश्चसामानाधि
करण्येननिर्देशःब्रह्मेतिबृहत्वंस्वभावंउच्यते।तत्खंब्रह्मेतिवि
शिष्यतेयत्खंपूर्णब्रह्मतदोंकारवाच्यं।तथाचोक्तंप्रणवोवाचकश्चा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यच्छिवस्यपरमात्मनः॥शिवरुद्रादिरामोणाप्रणवोहिपरःस्मृतइति॥
तथावाचकेप्रणवेस्तोवाच्यंब्रह्मप्रसीदतीति॥वायव्यसंहितायां॥नहि
नादास्तरामंज्ञानदेवःस्यात्मनःपरः॥नमनसःपरापूज्यानहितत्रेप
रंपूजास्मिति॥तणादप्यधिचनीचेनतरोरपिसहिष्णुना॥अमानिना
मानदेनकीर्तनीयःसदाहरिः॥प्रतिष्ठाशूकरीविष्टागौरवंशुध्द
गौरवं॥आराद्दूरेव्याधिकोदारुणोभावेरमनितेवयं॥दर्शनाध्दरते
चित्तंस्पर्शनाध्दरतेबलं॥संभोगाध्दरतेवीर्यंनारीप्रत्यक्षराक्ष
सी॥सर्पिणीखादतिस्पर्शान्नाहीखादतिदुर्धरा॥तस्माद्दूषि
तोघाणाप्रफुल्लचादृशांतरंव्रजेत॥८॥इतिश्रीरुग्वाक्यसा
ध्यंसमाप्तंशुभंभवेतु॥॥८॥८॥८॥८॥८॥८॥८॥८॥८॥

K K S U LIBRARY
RAMTEK
441 106
M-1155
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=20.10.20 15:53
,TRANSFERRED=2020/10/20 at 15:57:51
,PAGES=32
,TYPE=STD
,NAME=S0004247
,Book Name=M-1155-ESHAVASYBHASYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection